# पञ्चमः खण्डः

# रचनात्मक-कार्यम्

## (क) प्रदत्तरूपरेखया कथासंयोजनम् /क्रमयोजनम्/सङ्केताधारित-वर्णनम्।

१. रचनात्मक-लेखनात् पूर्वं लेखकस्य मस्तिष्के सर्वे एव बिन्दवः स्पष्टाः भवेयुः। यथा मूर्तिकारः मूर्तिनिर्माणात् पूर्वं प्रतिमायाः एकं वैचारिकं आकारं स्वमनसि ध्यायेत्। लेखनस्य तदनुकूलं एकं स्पष्टं क्रमं च रचयेत्।

२. रूपरेखायाः पूर्णतया अनुसरणं भवेत्। कोऽपि बिन्दुः न विस्मर्तव्यः। बिन्दूनां क्रमः अपि रूपरेखायाः अनुकूलः भवति।

३. बिन्दूनां संयोजनं सहजं प्राकृतिकं वा भवेत्। बिन्दूनां रूपरेखायाः च क्रमयोजने कल्पनायाः आवश्यकता भवति।

४. संयोजनं /वर्णनं सर्वथा व्याकरणदोषरहितं भवेत्। भाषा सूक्तिभिः, लोकोक्तिभिः, वाक्रीतिभिः च विभूषिता, सरला, सहजा भवेत्।

५. संयोजने/वर्णने त्रीणि तत्त्वानि विशेषरूपेण ध्यातव्यानि, तद्यथा-सुसम्बद्धता, रोचकता, वर्णनकुशलता च। अभ्यासेन कल्पनाशक्त्या च शनैः शनैः अभ्यासः भवति।

अत्र कथानां रूपरेखाः, क्रमयोजनं, संकेतानुसार-वर्णनं च उदाहरण-रूपेण प्रस्तूयन्ते।

### कथासंयोजनम् -

प्रदत्तरूपरेखया कथासंयोजनं करणीयम् -

वृद्धः व्याघ्रः...............जाले बद्धः............न मुक्तः............मूषकः..........मोचयितुं प्रयासः...........अट्टहासम्..........क्षुद्रः जीवः.........जालकर्तनं...........बहिः कृतवान्।

एकस्मिन् वने वृद्धः व्याघ्रः निवसति स्म। तेन एकः शशकः जाले बद्धः। सः शशकः प्रचुरप्रयासेन अपि मुक्तः न अभवत्। जाले बद्धं शशकम् अवलोक्य एकः मूषकः तत्र अगच्छत्। तेन मूषकेन शशकं मोचयितुं प्रयासः कृतः। मूषकस्य इदं कृत्यं दृष्ट्वा अन्ये जीवाः अट्टहासम् अकुर्वन्। अनन्तरं तैः ज्ञातं यत् क्षुद्रः जीवः अपि प्रयासं कर्तुं शक्नोति। मूषकः जालकर्तनं कृत्वा शशकं बहिः कृतवान्।

### क्रमयोजनम् -

**क्रमरहितवाक्यानि समुचितक्रमानुसारं लिखत -**

१. चतुर्षु न कोऽपि पुत्रः यष्टिका-पुञ्जं त्रोटयितुम् अशकत्।

२. कृषकस्य चत्वार: पुत्रा: सर्वदा परस्परं कलहं कुर्वन्ति स्म।

३. कृषक: पुत्रेभ्य: कथयति यत् ते एकैकां यष्टिकां सरलतया त्रोटितवन्त:।

४. एकैकं पुत्रम् आहूय स: तं यष्टिका-पुञ्जं त्रोटयितुं कथयति।

५. सत्यमेव कथ्यते यत्- 'संघे शक्ति: कलौ युगे'।

६. प्रत्येकं पुत्र: सरलतया यष्टिका: त्रोटयति।

७. तदा स: कृषक: तान् पुत्रान् कथयति यत् ते एकैकां यष्टिकां त्रोटयेयु:।

८. तदा ते ज्ञातवन्त: यत् यदि ते संघे स्थिता: भविष्यन्ति तदा शक्तिसम्पन्ना: भविष्यन्ति।

**समुचित-क्रमानुसारम्-**

१. कृषकस्य चत्वार: पुत्रा: सर्वदा परस्परं कलहं कुर्वन्ति स्म।

२. एकैकं पुत्रम् आहूय स: तं यष्टिका-पुञ्जं त्रोटयितुं कथयति।

३. चतुर्षु न कोऽपि पुत्र: यष्टिका-पुञ्जं त्रोटयितुम् अशकत्।

४. तदा स: कृषक: तान् पुत्रान् कथयति यत् ते एकैकां यष्टिकां त्रोटयेयु:।

५. प्रत्येकं पुत्र: सरलतया यष्टिका: त्रोटयति।

६. कृषक: पुत्रेभ्य: कथयति यत् ते एकैकां यष्टिकां सरलतया त्रोटितवन्त:।

७. तदा ते ज्ञातवन्त: यत् यदि ते संघे स्थिता: भविष्यन्ति तदा शक्तिसम्पन्ना: भविष्यन्ति।

८. सत्यमेव कथ्यते यत् -'संघे शक्ति: कलौ युगे'।

**प्रदत्त संकेतानुसारं वर्णनं लिखत -**

रेलस्थानकम्, महान् कोलाहल:, भारवाहका:, रेलयानानि, हरितदीपं, रक्तदीपं, विटिका, पृच्छावातायनम्, जलपानगृहाणि, कार्यालय:, सुन्दरं दृश्यम्।

एकदा मम विद्यालयस्य केचन छात्रा: भ्रमणार्थं रेलयानेन जयपुरनगरम् अगच्छन्। वयं सर्वे छात्रा: जयपुर-रेलस्थानक ात् बहि: अवातराम। तत्र महान् कोलाहल: श्रूयते स्म। तत्र एक: सुन्दर: कार्यालय: आसीत्। अस्माभि: तत्र उपस्थितम् एकम् अधिकारिणम् निवेदित यत् अस्माकं प्रयोगार्थं भारवाहकानां व्यवस्थां करोतु। येन वयं जलयानं ग्रहीतुं शक्नुम:। अनन्तरं वयं एकं सुन्दरं दृश्यम् अवलोकयितुं रेलस्थानकात् बहि: गता:। तत्र बहव: रेलयानानि आसन्। रेलयानं हरितदीपस्य संकेतं प्राप्य चलति, रक्तदीपम् अवलोक्य रेलचालक: रेलयानं वारयति। रेलस्थानके यात्रिणां सम्मर्द: आसीत्। ते स्व-स्व स्थानं गच्छन्ति स्म। वयमपि स्व विद्यालयं निवर्तयामास।

## अभ्यासः

**(क) प्रदत्तरूपरेखया कथासंयोजनं करणीयम् –**

१. विशालः वृक्षः..........खगाः वसन्ति..........बुभुक्षिताः.........इतस्ततः भ्रमन्ति.........तण्डुलकणान् अपश्यन्...........खादन्ति..........जालेन बद्धाः........किं करणीयम्.........सर्वे जालेन सह एव एकं स्वमित्रम् अगच्छन्........मित्रम् एकः मूषकः.........जालं दन्तैः अकर्तयत्.........स्वतन्त्राः........सुखं तु एकतायाम् एव विद्यते।

२. नरः सरोवरतटे अभ्रमत्.........चिन्तने रतः.........वानराणां शब्दैः तस्य ध्यान-भङ्गः अभवत्........वानराः नातिदूरे.......धावितुम् आरभत्.........वानराः अपि अनुधावितवन्तः.......मा धाव, भयं त्यक्त्वा.......स्थिरः भव.........वृद्धजनस्य उच्च-स्वरं.......तत्रैव स्थितवन्तः..........वानरसमूहः पलायितः.........ज्ञानचक्षुषी उन्मीलिते........आपद्भ्यः मुक्तिः दृढसङ्कल्पेन,...........न ताभ्यः पलायनेन। किं भवन्तः जानन्ति एषः.........एषः आसीत् स्वामी.............।

**(ख) क्रमरहितवाक्यानि समुचितक्रमानुसारं लिखत –**

**अ –**

१. तस्य गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुलासीत्।
२. श्रेष्ठिनि पृष्टे सः आह– नद्यीतटात् सः श्येनेन हृतः।
३. सुचिरेण कालेन प्रत्यागतः सः श्रेष्ठिनं स्वतुलाम् अयाचत्।
४. तयोः वृत्तान्तं श्रुत्वा धर्माधिकारिभिः विहस्य द्वावेव तुला-शिशु-प्रदानेन सन्तोषितौ।
५. आसीत् कस्मिंश्चिद् अधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः।
६. श्रेष्ठिः अवदत् – 'मूषकैः भक्षिता तुला।'
७. जीर्णधनः तुलां कस्यचित् श्रेष्ठिनः गृहे निक्षेपरूपेण स्थापयित्वा देशान्तरम् अगच्छत्।
८. श्रेष्ठिनः अनुमत्या जीर्णधनः तस्य पुत्रेण सह स्नानार्थं नदीमगच्छत्।

**ब –**

१. अस्ति च सायं समयः।
२. मासोऽयमाषाढः।
३. अस्मिन् समये एकः षोडशवर्ष-देशीयो गौरयुवा हयेन पर्वतश्रेणीः उपर्युपरि गच्छति स्म।
४. अस्तं जिगमिषुर्भगवान् भास्करः।
५. एष सुघटितदृढ-शरीरः।
६. कोऽपि शिववीरस्य विश्वासपात्रं सिंहदुर्गात् तस्यैव पत्रमादाय तोरणदुर्गं प्रयाति।
७. एषः श्याम-श्यामैर्गुच्छ-गुच्छैः कुचितैः-कुचितैः कचकलापैः कमनीयकपोलपालिः।
८. एषः समाच्छादित-ललाट-कपोल-नासाग्रोरोष्ठः प्रसन्नवदनाम्भोजप्रदर्शितः।

**सङ्केताधारित-वर्णनम् –**

( स ) प्रदत्त संकेतानुसारं वर्णनं लिखत –

१. महाकविः कालिदासः, श्रेष्ठः कविः, सप्त-कृतयः, प्रसिद्धतमं नाटकं, उपमा-प्रयोगः, वैदर्भी रीतिः, महाकाव्यद्वयं, खण्डकाव्यद्वयं, कलापक्षः, भावपक्षः, विश्वसाहित्ये स्थानम्।

२. अस्माकं, मातृभूमौ, स्मरिष्यति, अत्र, मधुरतराणि, परमेश्वराः, नानाविधानि, जन्मभूमिश्च।

## ( ख ) अनुवादकार्यम् –

**अनुवादकार्यार्थं किंचित् सङ्केताः ध्यातव्याः –**

**( क ) लट् + प्रथमा + प्रथमपुरुषः –**

| | |
|---|---|
| छात्र पढ़ता है। | छात्रः पठति। |
| वे दोनों हँसते है। | तौ हसतः। |
| आप यहाँ आते हैं। | भवान् अत्र आगच्छति। |
| आप लिखती है। | भवती लिखति। |
| वहाँ क्या हो रहा है? | तत्र किं भवति ? |

**( ख ) लट् + प्रथमा + मध्यमपुरुषः –**

| | |
|---|---|
| तुम लिखते हो। | त्वं लिखसि। |
| तुम दोनों कहते हो। | युवां वदथः। |
| तुम सब पढ़ते हो। | यूयं पठथ। |

**( ग ) लट् + प्रथमा + उत्तमपुरुषः –**

| | |
|---|---|
| मैं देखता हूँ। | अहं पश्यामि। |
| हम दोनों खेलते हैं। | आवां क्रीड़ावः। |
| हम सब जीतते हैं। | वयं जयामः। |

**( घ ) लोट् + द्वितीया –**

| | |
|---|---|
| वह खाना खाये। | सः भोजनं खादतु। |
| तू गाँव को जा। | त्वं ग्रामं गच्छ। |
| मैं यहाँ से चलूँ। | अहं इतः चलानि। |

**( ङ) लृट् + द्वितीया द्विकर्मक–**

| | |
|---|---|
| भारत शत्रु से युद्ध जीतेगाा। | भारतः शत्रुं युद्धं जेष्यति। |
| शिक्षक शिष्य से प्रश्न पूँछेगा। | शिक्षकः शिष्यं प्रश्नं प्रक्ष्यति। |
| ग्वाला गाँव से गाय को ले जायेगा। | गोपः ग्रामं गां नेष्यति। |

**( च ) लङ्+ तृतीया –**

| | |
|---|---|
| राजा के साथ सेनापति चला। | भूपतिना सह सेनापतिः अचरत्। |

| | | |
|---|---|---|
| | संन्यासी के साथ कवि ने गाया। | यतिना सार्धं कवि अगायत्। |
| | मुनि ने सत्य से संसार को जीता। | मुनिः सत्येन लोकम् अजयत्। |
| **(छ)** | **विधिलिङ्ग + चतुर्थी –** | |
| | उसे उस ब्राह्मण को धन देना चाहिए। | सः तस्मै विप्राय धनं दद्यात्। |
| | तुमे किस शिष्य को ज्ञान देना चाहिए ? | त्वं कस्मै शिष्याय ज्ञानं वितरेः ? |
| | शिष्य का हित हो। | शिष्याय हितं भवेत्। |
| **(ज)** | **सर्वनाम पुल्लिङ्ग + पंचमी** | |
| | उस वृक्ष से यह पता गिरा। | तस्माद् वृक्षात् एतत् पत्रम् अपतत्। |
| | इस घोड़े से वह मनुष्य गिरता है। | अस्माद् अश्वात् स नरः पतति। |
| | यह शिष्य उस गुरु से पढ़ता है। | एषः शिष्यः तस्माद् गुरोः अधीते। |
| **(झ)** | **सर्वनाम स्त्रीलिङ्ग + षष्ठी** | |
| | यह उस बालिका की पुस्तक है। | इदं तस्याः बालिकायाः पुस्तकम् अस्ति। |
| | वह कन्या इस बकरी का दूध चाहती है। | सा कन्या अस्याः अजायाः दुग्धम् अभिलषति। |
| | वह बालिका किस कन्या की बहिन है ? | सा बालिका कस्याः कन्यायाः भगिनी अस्ति ? |
| **(ञ)** | **युष्मद् + सप्तमी** | |
| | तुझमें सत्य है। | त्वयि सत्यं वर्तते। |
| | तुम दोनों में ज्ञान है। | युवयोः ज्ञानम् अस्ति। |
| | तुम सब में ईश्वर है। | युष्मासु ईश्वरः अस्ति। |
| **(ट)** | **अस्मद्** | |
| | कार्य पूरा करने पर मैं विद्यालय गया। | कार्ये कृते सति अहं विद्यालयम् अगच्छम्। |
| | मेरी सत्य में श्रद्धा और निष्ठा है। | मम सत्ये श्रद्धा निष्ठा वा वर्तते। |
| | हमारी ईश्वर में अभिलाषा हो। | अस्माकम् ईश्वरेऽभिलाषा वर्तताम्। |
| **(ठ)** | **परिचयः –** | |
| | मेरा नाम नरेन्द्र है। | मम नाम नरेन्द्रः। |
| | आपका नाम क्या है ? (पुरुष से) | भवतः नाम किम् ? |
| | आपका नाम क्या है ? (महिला से) | भवत्याः नाम किम् ? |
| | मैं अध्यापक हूँ। | अहम् अध्यापकः। |
| | आप कौन है ? (पुरुष से) | भवान् कः ? |
| | आप कौन है ? (महिला से) | भवती का ? |
| | मेरे पिताजी का नाम गोपाल है। | मम पितुः नाम गोपालः। |
| | आपके पिताजी का नाम क्या है ? | (पुरुष से) भवतः पितुः नाम किम् ? |
| | आपके पिता/माता का नाम क्या है? (महिला से) | भवत्याः पितुः/मातुः नाम किम् ? |

| | |
|---|---|
| मैं बाँसवाड़ा नगर में रहता हूँ। | अहं बाँसवाड़ा नगरे निवसामि। |
| आप कहाँ रहते/रहती हो ? | भवान्/भवती कुत्र निवसति ? |

**( ड ) विविधानि वाक्यानि –**

| | |
|---|---|
| संगठन से ही भारत विश्वगुरु बनेगा। | संगठनेनैव भारतं विश्वगुरुः भविष्यति। |
| योग से शरीर स्वस्थ होता है। | योगेन शरीरं स्वस्थं तिष्ठति। |
| वेद सर्वाधिक प्रामाणिक ग्रन्थ हैं। | वेदाः सर्वाधिकाः प्रामाणिकाः ग्रन्थाः सन्ति। |
| जननी और जन्मभूमि स्वर्ग से महान् है। | जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। |
| उठो, जागो और लक्ष्यप्राप्ति तक मत रुको। | उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत। |
| सज्जनों की बात माननी चाहिए। | कर्तव्यं हि सतां वचः। |
| अनेक गुणों में एक दोष छिप जाता है। | एको हि दोषो गुणसन्निपाते निमज्जति। |
| दूसरे को उपदेश देना बहुत सरल है। | सुखमुपदिश्यते परस्य। |
| बड़ों का अनुकरण करो। | महतां पदम् अनुविधेयम्। |
| तृष्णा कभी कम नहीं होती। | तृष्णैका तरुणायते। |
| संसार में कोई भी सर्वज्ञ नहीं। | न हि सर्वविदः सर्वे। |
| बन्धु के समान कोई बल नहीं। | नास्ति बन्धुसमं बलम्। |
| योगी को संसार तिनके के समान है। | निःस्पृहस्य तृणं जगत्। |
| जो जैसा बीज बोता है वैसा ही फल प्राप्त करता है। | यो यद्वपति बीजं लभते सोऽपि तत्फलम्। |

## अभ्यासः

**( क ) रिक्तस्थानेषु उचितपदानि पूरयत –**

१. इदं तस्याः .............. पुस्तकम् अस्ति (बालिका)
२. ...........सत्यं वर्तते (युष्मद्)
३. .............कृते सति अहं विद्यालयम् अगच्छम् (कार्य)
४. .............भोजनं खादतु (तत् पुँ.)
५. ..............सह सेनापतिः अचरत् (भूपतिः)
६. सः तस्मै .......... धनं दद्यात् (विप्रः)
७. ...............हितं भवेत् (शिष्यः)
८. तस्माद्................एतत् पत्रम् अपतत् (वृक्षः)
९. एषः शिष्यः तस्माद्............अधीते (गुरुः)
१०. ............ पदम् अनुविधेयम् (महत्)

**( ख ) संस्कृतानुवादं कुरुत –**

१. वह गाँव को जाता है।

२. आप वहाँ जाते है।

३. वे सब यहाँ आते हैं।

४. तू राज्य की रक्षा करता है।

५. तुम दोनों कब भोजन बनाते हो।

६. तुम लोग ईश्वर को प्रणाम करते हो।

७. मैं फूल सूँघता हूँ।

८. हम दोनों पाठशाला जाते हैं।

९. हम वहाँ से नहीं आ रहे है।

१०. वे सातों बालक ईश्वर का चिन्तन करते हैं।

❀ ❀ ❀